
# ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 17/08/2012 | **Typing Started on** | **H K Srinivasa Rao** |
| 2 | 17/08/2012 | **Typing Ended on** | **H K Srinivasa Rao** |
| 3 | 19/08/2012 | **Proof Reading & Correction** | **Pavan BS, Venugopal MS & H K S Rao** |
| 4 | 06/05/2013 | **II Proof Editing** | **H K Srinivasa Rao with Narahari Rattihalli** |
| | | | |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Acharya Madhwa. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, Skype Id: SRKARC6070*

*Email :* ***srkarc@gmail.com***

---

### ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

"ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ"

ಗ್ರಂಥ ಋಣ:ಆಚಾರ್ಯ ಪ್ರಭಞ್ಜನರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳು

# कृष्णामृतमहार्णवः

अर्चितः संस्मृतो ध्यातः कीर्तितः कथितः श्रुतः ।
यो ददात्यमृतत्वं हि स मां रक्षतु केशवः ॥ 1 ॥

तापत्रयेण सन्तप्तं यदेतदखिलं जगत् ।
वक्ष्यामि शान्तये तस्य कृष्णामृतमहार्णवम् ॥ 2 ॥

ते नराः पशवो लोके किं तेषां जीविते फलम् ।
यैर्न लब्धा हरेर्दीक्षा नार्चितो वा जनार्दनः ॥ 3 ॥

संसारेऽस्मिन् महाघोरे जन्मरोगभयाकुले ।
अयमेको महाभागः पूज्यते यदधोक्षजः ॥ 4 ॥

स नाम सुकृती लोके कुलं तेन ह्यलङ्कृतम् ।
आधारः सर्वभूतानां येन विष्णुः प्रसादितः ॥ 5 ॥

यज्ञानां तपसां चैव शुभानां चैव कर्मणाम् ।
तद्विशिष्टफलं नृणां सदैवाराधनं हरेः ॥ 6 ॥

कलौ कलिमलध्वंसिसर्वपापहरं हरिम् ।
येऽर्चयन्ति सदा नित्यं ते च वन्द्या यथा हरिः ॥ 7 ॥

नास्ति श्रेयस्तमं नृणां विष्णोराराधनान्मुने ।
युगेऽस्मिंस्तामसे लोके सततं पूज्यते हरिः ॥ 8 ॥

अर्चिते देवदेवेशे शङ्खचक्रगदाधरे ।
अर्चिताः सर्वदेवाः स्युर्यतः सर्वगतो हरिः ॥ 9 ॥

स्वर्चिते सर्वलोकेशे सुरासुरनमस्कृते ।
केशवे कंसकेशिघ्ने न याति नरकं नरः ॥ 10 ॥

सकृदभ्यर्च्य गोविन्दं बिल्वपत्रेण मानवः ।
मुक्तिभागी निरातङ्की विष्णुलोके महीयते ॥ 11 ॥

सकृदभ्यर्चितो येन हेलयाऽपि नमस्कृतः ।
स याति परमं स्थानं यत् सुरैरपि दुर्लभम् ॥ 12 ॥

**श्रीनारद उवाच**

समस्तलोकनाथस्य देवदेवस्य शार्ङ्गिणः ।
साक्षाद्भगवतो विष्णोः पूजनं जन्मनः फलम् ॥ 13 ॥

**पुलस्त्यः**

भक्त्या दूर्वाङ्कुरैः पुम्भिः पूजितः पुरुषोत्तमः ।
हरिर्ददाति हि फलं सर्वयज्ञैश्च दुर्लभम् ॥ 14 ॥

विधिना देवदेवेशः शङ्खचक्रधरो हरिः ।

फलं ददाति सुलभं सलिलेनापि पूजितः॥ 15 ॥

**नारदः**

नरके पच्यमानस्तु यमेन परिभाषितः ।

किं त्वया नार्चितो देवः केशवः क्लेशनाशनः ॥ 16 ॥

**शङ्करः**

द्रव्याणामप्यभावे तु सलिलेनापि पूजितः ।

यो ददाति स्वकं स्थानं स त्वया किं न पूजितः ॥ 17 ॥

**धर्म उवाच**

नरसिंहो हृषीकेशः पुण्डरीकनिभेक्षणः ।

स्मरणान्मुक्तिदो नृणां स त्वया किं न पूजितः ॥ 18 ॥

**ब्रह्मोवाच**

गर्भस्थिता मृता वाऽपि मुषितास्ते सुदूषिताः ।

न प्राप्ता यैर्हरेर्दीक्षा सर्वदुःखविमोचनी ॥ 19 ॥

**मार्कण्डेयः**

सकृदभ्यर्चितो येन देवदेवो जनार्दनः ।

यत् कृतं तत् कृतं तेन सम्प्राप्तं परमं पदम् ॥ 20 ॥

धर्मार्थकाममोक्षाणां नान्योपायास्तु विद्यते ।

सत्यं ब्रवीमि देवेश हृषीकेशार्चनादृते ॥ 21 ॥

तस्य यज्ञ वराहस्य विष्णोरमिततेजसः ।

प्रणामं ये प्रकुर्वन्ति तेषामपि नमो नमः ॥ 22 ॥

**मरीचिः**

अनाराधितगोविन्दनरैः स्थानं नृपात्मज ।

न हि सम्प्राप्यते श्रेष्ठं तस्मादाराधयाच्युतम् ॥ 23॥

**अत्रिः**

परः पराणां पुरुषस्तुष्टो यस्य जनार्दनः ।

स चाप्नोत्यक्षयं स्थानमेतत् सत्यं मयोदितम् ॥ 24 ॥

**अङ्गिराः**

यस्यान्तः सर्वमेवेदमच्युतस्याव्ययात्मनः ।

तमाराधय गोविन्दं स्थानमग्र्यं यदिच्छसि ॥ 25 ॥

**पुलस्त्यः**

परंब्रह्म परंधाम योऽसौ ब्रह्म सनातनम् ।

तमाराध्यं हरिं याति मुक्तिमप्यतिदुर्लभाम् ॥ 26 ॥

ऐन्द्रमिन्द्रः परं स्थानं यमाराध्य जगत्पतिम् ।

प्राप यज्ञपतिं विष्णुं तमाराधय सुव्रत ॥ 27 ॥

प्राप्नोत्याराधिते विष्णौ मनसा यद्यदिच्छति ।

त्रैलोक्यान्तर्गतं स्थानं किमु लोकोत्तरोत्तरम् ॥ 28 ॥

ये स्मरन्ति सदा विष्णुं शङ्खचक्रगदाधरम् ।
सर्वपापविनिर्मुक्ताः परंब्रह्म विशन्ति ते ॥ 29 ॥

ततोऽनिरुद्धं देवेशं प्रद्युम्नं च ततः परम् ।
ततः सङ्कर्षणं देवं वासुदेवं परात्परम् ॥ 30 ॥

वासुदेवात् परं नास्ति इति वेदान्तनिश्चयः ।
वासुदेवं प्रविष्टानां पुनरावर्तनं कुतः ॥ 31 ॥

**अत्रिः**

यो यानिच्छेन्नरः कामान् नारी वा वरवर्णिनी।
तान् समाप्नोति विपुलान् समाराध्य जनार्दनम् ॥ 32 ॥

**ब्रह्मा**

बाहुभ्यां सागरं तर्तुं क इच्छेतपुमान् भुवि ।
वासदेवमनाराध्य को मोक्षं गन्तुमिच्छति॥ 33 ॥

अनाराधितगोविन्दा ये नरा दुःखभागिनः ।
आराध्य वासुदेवं स्युर्नित्यानन्दैकभागिनः ॥ 34 ॥

**शङ्करः**

कृते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तं तु तस्योक्तं हरिसंस्मरणं परम् ॥ 35॥

न ह्यपुण्यवतांलोके मूढानां कुटिलात्मनाम् ।
भक्तिर्भवति गोविन्दे स्मरणं कीर्तनं तथा ॥ 36 ॥

तदैव पुरुषो मुक्तो जन्ममृत्युजरादिभिः ।
जितेन्द्रियो विशुद्धात्मा यदैव स्मरते हरिम् ॥ 37 ॥

प्राप्ते कलियुगे घोरे धर्मज्ञानविवर्जिते ।
न कश्चित् स्मरते लोके कृष्णं कलिमलापहम् ॥ 38 ॥

न कलौ देवदेवस्य जन्मदुःखापहारिणः ।
करोति मर्त्यो मूढात्मा स्मरणं कीर्तनं हरेः ॥ 39 ॥

ये स्मरन्ति सदा विष्णुं विशुद्धेनान्तरात्मना ।
ते प्रयान्ति भवं त्यक्त्वा विष्णुलोकमनामयम् ॥ 40 ॥

गर्भदुःखजरारोगजन्मसंसारबन्धनैः ।
न बाध्यते नरो नित्यं वासदेवमनुस्मरन् ॥ 41 ॥

यममार्गं महाघोरं नरकाणि यमं तथा ।
स्वप्नेऽपि नैव पश्येत यः स्मरेद्गरुडध्वजम् ॥ ॥ 42 ॥

हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ।
पादोदकं च निर्माल्यं मस्तके यस्य सोऽच्युतः ॥ 43 ॥

गोविन्दस्मरणं पुंसां पापराशिमहाचलम् ।

असंशयं दहत्याशु तूलराशिमिवानलः ॥ 44 ॥

**अगस्त्यः**

स्मरणादेव कृष्णस्य पापसङ्घातपञ्जरः ।

शतधा भेदमायाति गिरिर्वज्र हतो यथा ॥ 45 ॥

कृष्णे रताः कृष्णमनुस्मरन्तस्तद्भावितास्तद्गतमानसाश्च ।

भिन्नेऽपि देहे प्रविशन्ति कृष्णं हविर्यथा मन्त्रहुतं हुताशे ॥ 46

सा हानिस्तन्महच्छिद्रं सा चान्धजडमूकता ।

यन्मूहूर्तं क्षणं वाऽपि वासुदेवो न चिन्त्यते ॥ 47 ॥

नारायणो नाम नरो नराणां प्रसिद्धचोरः कथितः पृथिव्याम् ।

अनेकजन्मार्जितपापसञ्चयं हरत्यशेषं स्मृतमात्र एव ॥ 48॥

यस्य संस्मरणादेव वासुदेवस्य चक्रिणः ।

कोटिजन्मार्जितं पापं तत्क्षणादेव नश्यति ॥ 49॥

किं तस्य बहुभिस्तीर्थैः किं तपोभिः किमध्वरैः ।

योनित्य ध्यायते देवं नारायणमनन्यधीः ॥ 50 ॥

ये मानवा विगतरागपरावरज्ञा नारायणं सुरगुरुं सततं स्मरन्ति ।

ध्यानेन तेन हतकिल्बिषचेतनास्ते मातुः पयोधररसं न पुनः पिबन्ति ॥ 51 ॥

हे चित्त चिन्तयस्वेह वासुदेवमहर्निशम् ।
नूनं यश्चिन्तितः पुंसां हन्ति संसारबन्धनम् ॥ 52 ॥

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥ 53 ॥

स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् ॥ 54 ॥

वेदेषु यज्ञेषु तपस्सु चैव दानेषु तीर्थेषु व्रतेषु यच्च ।
इष्टेषु पूर्तेषु च यत्प्रदिष्टं पुण्यं स्मृते तत्खलु वासुदेवे ॥ 55 ॥

**और्वः**

आराध्यैवं नरो विष्णुं मनसा यद्यदिच्छति ।
फलं प्राप्नोति विपुलं भूरि स्वल्पमथापि वा ॥ 56 ॥

यन्नामकीर्तनं भक्त्या विलापनमनुत्तमम् ।
मैत्रेयाशेषपापानां धातूनामिव पावकः ॥ 57 ॥

कलिकल्मषमत्युग्रं नरकार्तिप्रदं नृणाम् ।
प्रयाति विलयं सद्यः सकृत् सङ्कीर्तितेऽच्युते ॥ 58 ॥

अनायासेन चायान्ति मुक्तिं केशवसंश्रिताः ।
तद्विघाताय जायन्ते शक्राद्याः परिपन्थिनः ॥ 59 ॥

चतुःसागरमासाद्य जम्बूद्वीपोत्तमे क्वचित् ।
न पुमान् केशवादन्यः सर्वपापचिकित्सकः ॥ 60 ॥

यदभ्यर्च्य हरिं भक्त्या कृते वर्षसहस्रकम् ।
फलं प्राप्नोत्यविकलं कलौ सङ्कीर्त्य केशवम् ॥ 61 ॥

क्षीयते तु यदा धर्मः प्राप्ते घोरे कलौ युगे ।
तदा न कीर्तयेत् कश्चिन्मुक्तिदं देवमच्युतम् ॥ 62 ॥

अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ।
पुमान् विमुच्यते सद्यः सिंहत्रस्तमृगैरिव ॥ 63 ॥

**ब्रह्मा**

नारायणेति मन्त्रोऽस्ति वागस्ति वशवर्तिनी ।
तथाऽपि नरके घोरे पतन्तीत्येतदद्भुतम् ॥ 64 ॥

अर्ता विषण्णा शिथिलाश्च भीता घोरेषु च व्याधिषु वर्तमानाः ।
सङ्कीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भवन्ति ॥ 65 ॥

**कौशिकः**

अनाराधितगोविन्दा ये नरा दुःखभागिनः ।
आराध्य वासुदेवं स्युः सदानन्दैकभोगिनः ॥ 66 ॥

सकृदुच्चरितं यैस्तु कृष्णेति न विशंति ते ।
गर्भागारगृहं मातुर्यमलोकं च दुःसहम् ॥ 67 ॥

क्व नाकपृष्ठगमनं पुनरावृत्तिलक्षणम् ।
क्व जपो वासुदेवेति मुक्तिबीजमनुत्तमम् ॥ 68 ॥

बुद्ध्या बुद्ध्वा वदस्वैनं हरिरित्यक्षरद्वयम् ।
स्मरणात् कीर्तनाद्यस्य न पुनर्जायते क्वचित् ॥ 69 ॥

हे जिह्वे मम निस्नेहे हरिं किं नु न भाषसे ।
हरिं वदस्य कल्याणि संसारोदधिनौर्हरिः ॥ 70 ॥

असारे खलु संसारे सारात् सारतरो हरिः ।
पुण्यहीना न विन्दन्ति सारङ्गाश्च यथा जलम् ॥ 71 ॥

कुरुक्षेत्रेण किं तस्य किं काश्या पुष्करेण किम् ।
जिह्वाग्रे वर्तते यस्य हरिरित्यक्षरद्वयम् ॥ 72 ॥

**ब्रह्मा**

असारे खलु संसारे सारामेकं निरूपितम् ।
समस्तलोकनाथस्य सारमाराधनं हरेः ॥ 73 ॥

सा जिह्वा या हरिं स्तौति तच्चित्तं यत्तदर्पणम् ।
तावेव केवलौ श्लाघ्यौ यौ तत्पूजाकरौ करौ ॥ 74 ॥

यस्तु विष्णुपरो नित्यं दृढभक्तिर्जितेन्द्रियः ।
स्वगृहेऽपि वसन् याति तद्विष्णोः परमं पदम् ॥ 75 ॥

शङ्करः

साधु साधु महाभाग साधु दानवनाशन।
यन्मा पृच्छसि धर्मज्ञ केशवाराधनं प्रति ॥ 76 ॥

निमिषं निमिषार्धं वा मुहूर्तमपि भार्गव ।
नादग्धाशेषपापानां भक्तिर्भवति केशवे ॥ 77 ॥

किं तेन मनसा कार्यं यन्न तिष्ठति केशवे ।
मनो मुक्तिफलावाप्तौ कारणं सुप्रयोजितम् ॥ 78 ॥

नूनं तत्कण्ठशालूकमथवाऽप्युपजिह्विका ।
रोगो नाम न सा जिह्वा या न वक्ति हरेर्गुणान् ॥ 79 ॥

भारभूतैः करैः कार्यं किं तस्य नृपशोर्द्विजाः ।
यैर्हि न क्रियते विष्णोर्गृहसंमार्जनादिकम् ॥ 80 ॥

चरणौ तौ तु सफलौ केशवालयगामिनौ ।
ते च नेत्रे  महाभागे याभ्यां सन्दृश्यते हरिः ॥ 81 ॥

किं तस्य चरणैः कार्यं वृथासञ्चरणैर्द्विजाः ।
यैर्हि न व्रजते जन्तुः केशवालयदर्शने ॥ 82 ॥

वेदवेदान्तविदुषां मुनीनां भावितात्मनाम् ।
ऋषित्वमपि धर्मज्ञ विज्ञेयं तत्प्रसादजम् ॥ 83 ॥

विचित्र रत्नपर्यङ्के महाभोगे च भोगिनः ।

रमन्ते नाकिरामाभिः केशवस्मरणात् फलम् ॥ 84 ॥

अश्वमेधसहस्राणां यः सहस्रं समाचरेत् ।

नासौ तत्फलमाप्नोति तद्भक्तैर्यदवाप्यते ॥ 85 ॥

रे रे मनुष्याः पुरुषोत्तमस्य करौ न कस्मान्मुकलीकुरुध्वम्

क्रियाजुषां को भवतां प्रयासः फलं हि यत्तत्पदमच्युतस्य ॥ 86 ॥

विष्णोर्विमानं यः कुर्यात्सकृद्भक्त्या प्रदक्षिणम् ।

अश्वमेधसहस्रस्य फलमाप्नोति मानवः ॥ 87 ॥

प्रदक्षिणं तु यः कुर्याद्धरिं भक्त्या समन्वितः ।

हंसयुक्तविमानेन विष्णुलोकं स गच्छति ॥ 88॥

तीर्थकोटिसहस्राणि व्रतकोटिशतानि च।

नारायणप्रणामस्य कलां नार्हन्ति षोडशीम् ॥ 89 ॥

उरसा शिरसा दृष्ट्या मनसा वचसा तथा ।

पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग ईरितः ॥ 90 ॥

शाठ्येनापि नमस्कारं कुर्वतः शार्ङ्गपाणये ।

शतजन्मार्जितं पापं नश्यत्येव न संशयः ॥ 91 ॥

संसारार्णवमग्नानां नराणां पापकर्मणाम् ।
नान्योद्धर्ता जगन्नाथं मुक्त्वा नारायणं परम् ॥ 92 ॥

रेणुकुण्ठितगात्रस्य कणा यावन्ति भारत ।
तावद्वर्षसहस्राणि विष्णुलोके महीयते ॥ 93 ॥

पावनं विष्णुनैवेद्यं सुभोज्यमृषिभिः स्मृतम् ।
अन्यदेवस्य नैवेद्यं भुक्त्वा चान्द्रायणं चरेत् ॥ 93 ॥

कोट्यैन्दवसहस्रैस्तु मासोपोषणकोटिभिः ।
यत्फलं लभ्यते पुम्भिर्विष्णोर्नैवेद्यभक्षणात् ॥ 95 ॥

त्रिरात्रफलदा नद्यो याः काश्चिदसमुद्रगाः ।
समुद्रगास्तु पक्षस्य मासस्य सरितां पतिः ॥ 96 ॥

षण्मासफलदा गोदा वत्सरस्य तु जाह्नवी ।
विष्णुपादोकस्यैताः कालां नार्हन्ति षोडशीम् ॥ 97 ॥

गङ्गाप्रयागगयपुष्करनैमिषाणि संसेवितानि बहुशः कुरुजाङ्गलानि ।
कालेन तीर्थसलिलानि पुनन्ति पापं पादोदकं भगवतः प्रपुनाति सद्यः॥ 98 ॥

यानि कानि च तीर्थानि ब्रह्माण्डान्तर्गतानि च ।
विष्णुपादोदकस्यैते कलां नार्हन्ति षोडशीम् ॥ 99 ॥

स्नानं पादोदकं विष्णोः पिबन् शिरसि धारयन् ।
सर्वपापविनिर्मुक्तो वैष्णवीं सिद्धिमाप्नुयात् ॥ 100 ॥

यथा पादोदकं पुण्यं निर्माल्यं चानुलेपनम् ।
नैवेद्यं धूपशेषं च आरार्तिश्च तथा हरेः ॥ 101 ॥

तुलस्यास्तु रजोजुष्टनैवेद्यस्य च भक्षणम् ।
निर्माल्यं शिरसा धार्यं महापातकनाशनम् ॥ 102 ॥

भक्त्या वा यदि वाऽभक्त्या चक्राङ्कितशिलां प्रति ।
दर्शनं स्पर्शनं वाऽपि सर्वपापप्रणाशनम् ॥ 103 ॥

सालग्रामोद्भवो देवो देवो द्वारवतीभवः ।
उभयोः स्नानतोयेन ब्रह्महत्यां व्यपोहति ॥ 104 ॥

म्लेच्छदेशेऽशुचौ वाऽपि चक्राङ्को यत्र तिष्ठति ।
योजनानि तथा त्रीणि मम क्षेत्रं वसुन्धरे ॥ 105 ॥

सालग्रामोद्भवो देवो शैलं चक्राङ्कमण्डितम् ।
यत्रापि नीयते तत्र वाराणस्याः शताधिकम् ॥ 106 ॥

सालग्रामोद्भवो देवो देवो द्वारवतीभवः ।
उभयो सङ्गमो यत्र मुक्तिस्तत्र न संशयः ॥ 107 ॥

हरिणा मुक्तिदानीह मुक्तिस्थानानि सर्वशः ।

स यस्य सर्वभावेषु तस्य तैः किं प्रयोजनम् ॥ 108 ॥

हरिर्याति हरिर्याति दस्युव्याजेन यो वदेत् ।

सोऽपि सद्गतिमाप्नोति गतिं सकृतिनो यथा ॥ 109 ॥

वासुदेवं परित्यज्य योऽन्यं देवमुपासते ।

त्यक्त्वाऽमृतं स मूढात्म भुङ्क्ते हालाहलं विषम् ॥ 110 ॥

त्यक्त्वाऽमृतं यथा कश्चिदन्यपानं पिबेन्नरः ।

तथा हरिं परित्यज्य चान्यं देवमुपासते ॥ 111 ॥

स्वधर्मं तु परित्यज्य परधर्मं यथा चरेत् ।

तथा हरिं परित्यज्य योऽन्यं देवमुपासते ॥ 112 ॥

गां च त्यक्त्वा विमूढात्मा गार्दभीं वन्दते यथा ।

तथा हरिं परित्यज्य चान्यं देवमुपासते ॥ 113 ॥

वासुदेवं परित्यज्य योऽन्यं देवमुपासते ।

तृषितो जाह्नवीतीरे कूपं खनति दुर्मतिः ॥ 114 ॥

यथा गङ्गोदकं त्यक्त्वा पिबेत् कूपोदकं नरः ।

तथा हरिं परित्यज्य योऽन्यं देवमुपासते ॥ 115 ॥

स्वमातरं परित्यज्य श्वपाकीं वन्दते यथा ।
तथा हरिं परित्यज्य चान्यं देवमुपासते ॥ 116 ॥

यावत् स्वस्थमिदं पिण्डं निरुजं करणान्वितम् ।
तावत् कुरुष्वात्महितं पश्चात्तापेन तप्यसे ॥ 117 ॥

यावत् स्वास्थ्यं शरीरेषु करणेषु च पाटवम् ।
तावदर्चय गोविन्दमायुष्यं सार्थकं कुरु ॥ 118 ॥

स्मर्यतां तु हृषीकेशो हृषीकेषु दृढेषु च ।
अदृढेषु हृषीकेषु हृषीकेशं स्मरन्ति के ॥ 119 ॥

यावच्चिन्तयते जन्तुर्विषयान् विषसन्निभान् ।
तावच्चेत् स्मरते विष्णुं को न मुच्येत बन्धनात् ॥ 120 ॥

यावत् प्रलपते जन्तुर्लोकवार्तादिभिः सदा ।
तावच्चेद्वन्दते विष्णुं को न मुच्येत बन्धनात् ॥ 121 ॥

**सूतः**

ज्ञात्वा विप्रास्तिथिं सम्यग् दैवज्ञैः समुदीरिताम् ।
कर्तव्य उपवासस्तु ह्यन्यथा नरकं व्रजेत् ॥ 122 ॥

क्षये वाऽप्यथवा वृद्धौ सम्प्राप्ते वा दिनक्षये ।
उपोष्या द्वादशी पुण्या पूर्वविद्धां परित्यजेत् ॥ 123 ॥

पूर्वविध्धां प्रकुर्वाणो नरो धर्मान् निकृन्तति ।
सन्ततेस्तु विनाशाया सम्पदो हरणाय च ॥ 124 ॥

कलावेधेऽपि विप्रेन्द्र दशम्यैकादशीं त्यजेत् ।
सुराया बिन्दुना स्पृष्टं गङ्गाम्भ इव सन्त्यजेत् ॥ 125 ॥

श्वदृतौ पञ्चगव्यं च दशम्या दूषितां त्यजेत् ।
एकादशीं द्विजश्रेष्ठाः पक्षयोरुभयोरपि ॥ 126 ॥

तस्माद्विप्रा न विद्धा हि कर्तव्यैकादशी क्वचित् ।
विद्धा हन्ति पुरापुण्यं श्राद्धं च वृषलीपतिः ॥ 127 ॥

जप्तं दत्तं हुतं स्नातं तथा पूजा कृता हरेः ।
तत् सर्वं विलयं याति तमः सूर्योदये यथा ॥ 128 ॥

एकादश्यां यदा ब्रह्मन् दिनक्षयतिथिर्भवेत् ।
उपोष्या द्वादशी तत्र त्रयोदश्यां तु पारणम् ॥ 129 ॥

प्रतिपत्प्रभृतयः सर्वा उदयादुदयाद्रवेः ।
सम्पूर्णा इति विज्ञेया हरिवासरवर्जिताः ॥ 130 ॥

अरुणोदयवेलायां दशमी यदि दृश्यते ।
न तत्रैकादशी कार्या धर्मकामार्थनाशिनी ॥ 131 ॥

अरुणोदयवेलायां दशमी यदि दृश्यते ।
पापमूलं तदा ज्ञेयमेकादश्युपवासनम् ॥ 132 ॥

चतस्रो घटिकाः प्रातररुणोदय उच्यते ।
यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशं जलम् ॥ 133 ॥

उदयात् प्राग् यदा विप्रा मुहूर्तद्वयसंयुता ।
सम्पूर्णैकादशी नाम तत्रैवोपवसेद्गृही ॥ 134 ॥

उदयात् प्राक् त्रिघटिकाव्यापिन्यैकादशी यदा ।
सन्दिग्धैकादशी नाम वर्ज्या धर्मार्थकाङ्क्षिभिः ॥ 135 ॥

पुत्रपौत्रविवृद्ध्यर्थं द्वादश्यामुपवासनम् ।
तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम् ॥ 136 ॥

उदयात् प्राग् द्विघटिकाव्यापिन्यैकादशी यदा ।
सङ्कीर्णैकादशी नाम वर्ज्या धर्मार्थकाङ्क्षिभिः ॥ 137 ॥

पुत्रराज्यविवृद्ध्यर्थं द्वादश्यामुपवासनम् ।
तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम् ॥ 138 ॥

दशमीशेषसंयुक्ता गान्धार्या समुपोषिता ।
तस्याः पुत्रशतं नष्टं तस्मात् तां परिवर्जयेत् ॥ 139 ॥

अपीषद्दशमीविद्धा तदा तां परिवर्जयेत् ।

सुराबिन्दुसमायुक्तां प्रवदन्ति मनीषिणः ॥ 140 ॥

बह्वागमविरोधेषु ब्रह्मणेषु विवादिषु ।

उपोष्या द्वादशी तत्र त्रयोदश्यां तु पारणम् ॥ 141 ॥

एकदश्यां तु विद्धायां सम्प्राप्ते श्रवणे तथा ।

उपोष्या द्वादशी पुण्या पक्षयोरुभयेरपि ॥ 142 ॥

उपरागसहस्राणि व्यतीपातायुतानि च

अमालक्षं तु द्वादश्याः कलां नार्हन्ति षोडशीम् ॥ 143 ॥

शुद्धाऽपि द्वादशी ग्राह्या परतो द्वादशी न चेत् ।

विषं तु दशमी ज्ञेयाऽमृतं चैकादशी तिथिः ।

विषप्रधाना वर्ज्या साऽमृता ग्राह्या प्रयत्नतः ॥ 144 ॥

द्वादश्यां भोजनं चैव विद्धायां हर्युपोषणम् ।

यः कुर्यान्मन्दबुद्धित्वान्निरयं सोऽधिगच्छति ॥ 145 ॥

यानि कानि च वाक्यानि विद्धोपाषापराणि तु ।

धनदार्चापराणि स्युर्वैष्णवी न दशायुता ॥ 146 ॥

अथवा मोहनार्थाय मोहिन्या भगवान् हरिः ।
अर्थितः कारयामास व्यासरूपी जनार्दनः ॥ 147 ॥

धनदार्चाविवृद्ध्यर्थं महावित्तलयस्य च ।
असुराणां मोहनार्थं पाषाण्डानां विवृद्धये ।
आत्मस्वरूपाविज्ञप्त्यै स्वलोकाप्राप्तयो तथा ॥ 148 ॥

एवं विद्धां परित्यज्य द्वादश्यामुपवासिनाम् ।
कोटिजन्मार्जितं पापमेकयैव विनश्यति ॥ 149 ॥

ततः कोटिगुणं वाऽपि निषिद्धस्येतरैर्जनैः ।
यदनादिकृतं पापं तदूर्ध्वं यत् करिष्यति ॥ 150 ॥

तत्सर्वं विलयं याति परेषामुवासनात् ।
न च तस्मात् प्रियतमः केशवस्य ममापि वा ॥ 151 ॥

एकादश्या ह्यवेधे तु द्वादशीं न परित्यजेत् ।
पारणे मरणे चैव तिथिस्तात्कालिकी स्मृता ॥ 152 ॥

ब्रह्मचारी गृहस्थो वा वानप्रस्थो यतिस्तथा ।
ब्राह्मणः क्षत्रिय वैश्यः शूद्रो भर्तृमती तथा ॥ 153 ॥

अभर्तृका तथाऽन्ये वा सूतवैदेहिकादिकाः ।
एकादश्यां न भुञ्जेत पक्षयोरुभयोरपि ॥ 154 ॥

एकादश्यां तु यो भुङ्क्ते मोहेनावृतचेतनः ।
शुक्लायामथ कृष्णायां निरयं याति स ध्रुवम् ॥ 155 ॥

विवेचयति यो मोहाच्छुक्ला कृष्णेति पापकृत् ।
एकादशीं स वै याति निरयं नात्र संशयः ॥ 156 ॥

यथा गौर्नैव हन्तव्या शुक्ला कृष्णेति भामिनि ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥ 157 ॥

यानि कानि च वाक्यानि कृष्णैकादशिवर्जने ।
भरण्यादिनिषेधेन तानि काम्यफलार्थिनाम् ॥ 158 ॥

कामिनोऽपि नियत्यर्थं कुर्युरेवोपवासनम् ।
प्रीणनाय हरेर्नित्यं न तु काम्यव्यपेक्षया ॥ 159 ॥

तस्माच्छुक्लामथो कृष्णां भरण्यादियुतामपि ।
प्रत्यवायनिषेधार्थमुपवासीत नित्यशः ।
प्रीणनार्थं हरेश्चापि विष्णुलोकस्य चाप्तये ॥ 160 ॥

कला वा घटिका वाऽपि परतो द्वादशी यदि ।
द्वादश द्वादशीर्हन्ति पूर्वेद्युः पारणे कृते ॥ 161 ॥

अतिरिक्ता द्वादशी चेत् तां नोपोषयेद्यदि ।
द्वादश द्वादशीर्हन्ति द्वादशी चातिलङ्घिता ॥ 162 ॥

द्वादश्यामतिरिक्तायां यो भुङ्क्ते पूर्ववासरे ।
द्वादश द्वादशीर्हन्ति द्वादशीं न परित्यजेत् ॥ 163 ॥

द्वादशीं श्रवोणोपेतां यो नोपोष्यात् सुमन्दधीः ।
पञ्चसंवत्सरकृतं पुण्यं तस्य विनश्यति ॥ 164 ॥

एकादशीमुपोष्याथ द्वादशीमप्युपोषयेत् ।
न तत्र विधिलोपः स्यादुभयोर्देवता हरिः ॥ 165 ॥

अल्पायामपि विप्रेन्द्र पारणं तु कथं भवेत् ।
पारयित्वोदकेनापि भुञ्जानो नैव दुष्यति ॥ 166 ॥

यदाल्पं द्वादशीं दृष्ट्वा निशीथादूर्ध्वमेव तु ।
आमध्याह्नाः क्रियाः सर्वाः कर्तव्याः शम्भुशासनात् ॥ 167 ॥

**व्यासः**

उषसि द्वे तु कर्तव्ये प्रातर्माध्याह्निकक्रिये ।
भुजेर्यदाऽपकर्षस्य तदन्तर्न्यायतो भवेत् ॥ 168 ॥

कर्तुं साध्यं यदा नालं द्वादश्यद्भिस्तु पारयेत् ।
कृतावल्पाशिवत् पश्चात् भुञ्जीतेत्यपरे जगुः ॥ 169 ॥

अशितानशिता यस्मादापो विद्वद्भिरीरिताः ।
अम्भसा केवलेनैव करिष्ये व्रतपारणम् ॥ 170 ॥

न काशी न गया गङ्गा न रेवा न च गौतमी ।
न चापि कौरवं क्षेत्रं तुल्यं भूप हरेर्दिनात् ॥ 171 ॥

अश्वमेधसहस्राणि वाजपेयायुतानि च ।
एकादश्युपवासस्य कलां नार्हन्ति षोडशीम् ॥ 172 ॥

एकादशीसमुत्थेन वह्निना पातकेन्धनम् ।
भस्मीभवति राजेन्द्र अपि जन्मशतोद्भवम् ॥ 173 ॥

नेदृशं पावनं किञ्चिन्नराणां भुवि विद्यते ।
यादृशं पद्मनाभस्य दिनं पातकहानिदम् ॥ 174 ॥

तावत् पापानि देहेऽस्मिन् तिष्ठन्ति मनुजाधिप ।
यावन्नोपोषयेज्जन्तुः पद्मनाभदिनं शुभम् ॥ 175 ॥

एकादशेन्द्रियैः पापं यत् कृतं भवति प्रभो ।
एकादश्युपवासेन तत् सर्वं विलयं भवेत् ॥ 176 ॥

एकादशीसमं किञ्चित् पापत्राणं न विद्यते ।
व्याजेनापि कृता राजन् न दर्शयति भास्करिम् ॥ 177 ॥

**श्रीव्यासः**

स ब्रह्महा स गोघ्नश्च स्तेनः स गुरुतल्पगः ।
एकादश्यां हि भुञ्जानः पक्षयोरुभयोरपि ॥ 178 ॥

वरं स्वमातृगमनं वरं गोमांसभक्षणम् ।
वरं हत्या सुरापानमेकादश्यां तु भोजनात् ॥ 179 ॥

एकादशीदिने प्राप्ते भुञ्जते ये नराधमाः ।
अवलोक्य मुखं तेषामादित्यमवलोकयेत् ॥ 180 ॥

पृथिव्यां यानि पापानि ब्रह्महत्यादिकानि च ।
अन्नमाश्रित्य तिष्ठन्ति सम्प्राप्ते हरिवासरे ॥ 181 ॥

**रुक्माङ्गदः**

अष्टवर्षाधिको यस्तु ह्यशीतिर्नहि पूर्यते ।
यो भुङ्क्ते मानवः पापी विष्णोरहनि चागते ॥ 182 ॥

पिता वा यदि वा पुत्रो भार्या वाऽपि सुहृज्जनः ।
पद्मनाभदिने भुङ्क्ते निग्राह्यो दस्युवद्भवेत् ॥ 183 ॥

**ब्रह्मा**

उपोष्य द्वादशीं पुण्यां सर्वपापक्षयप्रदाम् ।

न पश्यति यमं वाऽपि नरकाणि न यातनाः ॥ 184 ॥

रटन्ति हि पुराणानि भूयो भूयो वरानने ।

न भोक्तव्यं न भोक्तव्यं सम्प्राप्ते हरिवासरे ॥ 185 ॥

द्वादशी न प्रमोक्तव्या यावदायुः प्रवर्तते ।

अर्चनीयो हृषीकेशो विशुद्धेनान्तरात्मना ॥ 186 ॥

भक्त्या ग्राह्यो हृषीकेषो न धनैर्धरणीसुराः ।

भक्त्या सम्पूजितो विष्णुः फलं धत्ते समीहितम् ॥ 187 ॥

जलेनापि जगन्नाथः पूजितः क्लेशनाशनः ।

परितोषं प्रयात्याशु तृषार्तास्तु यथा जलैः ॥ 188 ॥

आसीनस्य शयानस्य तिष्ठतो व्रजतोऽपि वा ।

रमस्व पुण्डरीकाक्ष हृदये मम सर्वदा ॥ 189 ॥

सर्वगश्चैव सर्वात्मा सर्वावस्थासु चाच्युत ।

रमस्व पुण्डरीकाक्ष नृसिंह हृदये मम ॥ 190 ॥

करावलम्बनं देहि श्रीकृष्णकमलेक्षण ।

भवपङ्कार्णवे घोरे मज्जतो मम शाश्वत ॥ 191 ॥

त्राहि त्राहि जगन्नाथ वासुदेवाच्युताव्यय ।

मां समुद्धर गोविन्द दुःखसंसारसागरात् ॥ 192 ॥

एतत्पुण्यं परं गुह्यं पवित्रं पापनाशनम् ।

आयुष्यं च यशस्यं च कलौ दुःखप्रणाशनम् ॥ 193 ॥

कलौ पापं कियन्मात्रं हत्यास्तेयादिसम्भवम् ।

स्मृते मनसि गोविन्दे दह्यते तूलराशिवत् ॥ 194 ॥

कलौ केशवभक्तानां न भयं विद्यते क्वचित् ।

स्मृते सङ्कीर्तिते ध्याते सङ्क्षयम् याति पातकम् ॥ 195 ॥

अध्येतव्यमिदं शास्त्रं श्रोतव्यं च प्रयत्नतः ।

भक्तेभ्यश्च प्रदातव्यं धार्मिकेभ्यः पुनः पुनः ॥ 196 ॥

अधीयाना इदं नित्यं विष्णोर्माहात्म्यमुत्तमम् ।

सर्वपापविनिर्मुक्ताः प्राप्नुवन्ति परं पदम् ॥ 197 ॥

श्रुत्वा धर्मं विजानाति श्रुत्वा त्यजति दुर्मतिम् ।

श्रुत्वा ज्ञानमवाप्नोति श्रुत्वा मोक्षं च विन्दति ॥ 198 ॥

तस्मादिदं सदा श्राव्यं श्रोतव्यं च सदैव हि ।

कुतर्कदावदग्धेभ्यो न दातव्यं कदाचन ॥ 199 ॥

संसार विषपानेन ये मृताः प्राणिनो भुवि ।

अमृताय स्मृतस्तेषां कृष्णामृतमहार्णवः ॥ 200 ॥

क्लिन्नं पादोदकेनैव यस्य नित्यं कलेवरम् ।

तीर्थकोटिसहस्रैस्तु स्नातो भवति प्रत्यहम् ॥ 201 ॥

तोयं यदि पिबेन्नित्यं शालग्रामशिलाच्युतम् ।

तीर्थकोटिसहस्रैस्तु सेवितैः किं प्रयोजनम् ॥ 202 ॥

शालग्रामशिलास्पर्शं ये कुर्वन्ति दिने दिने ।

वाञ्छन्ति करसंस्पर्शं तेषां देवाः सवासवाः ॥ 203 ॥

दुःसहो नारको वह्निर्दुःसहा यमकिङ्कराः ।

विषमश्चान्तकपथः प्रेतत्वं चातिदारुणम् ॥ 204 ॥

विचिन्त्य मनसाऽप्येवं पातकाद्विनिवर्तयेत् ।

स्मरणं कीर्तनं विष्णोः सदैव न परित्यजेत् ॥ 205 ॥

**व्यासः**

तीर्थकोटिसहस्रैस्तु सेवितैः किं प्रयोजनम् ।

अच्युतानन्तगोविन्दनामोच्चारणभेषजाः ।

नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ 206 ॥

सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते।
वेदशास्त्रात् परं नास्ति न दैवं केशवात् परम् ॥ 207 ॥

सकृदुच्चारितं येन हरिरित्यक्षरद्वयम् ।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥ 208 ॥

एवं ब्रह्मादयो देवा ऋषयश्च तपोधनाः ।
कीर्तयन्ति सुरश्रेष्ठं देवं नारायणं प्रभुम् ॥ 209 ॥

किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः ।
यो नित्यं ध्यायते देवं नारायणमनन्यधीः ॥ 210 ॥

नित्योत्सवो भवत् तेषां नित्यश्रीर्नित्यमङ्गलम् ।
येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ॥ 211 ॥

जीवंश्चतुर्दशादूर्ध्वं पुरुषो नियमेन तु ।
स्त्री वाऽप्यनूनदशकं देहं मानुषमार्जते ॥ 212 ॥

चतुर्दशोर्ध्वजीवीनि संसारश्चादिवर्जितः ।
अविदित्वा परं देवं मोक्षाशा का महामुने ॥ 213 ॥

आचतुर्दशमाद्वर्षात् कर्माणि नियमेन तु ।
दशावराणां देहानां कारणानि करोत्ययम् ।
अतः कर्मक्षयान्मुक्तिः कुत एव भविष्यति ॥ 214 ॥

समानां विषमा पूजा विषमाणां समा तथा ।
क्रियते येन देवोऽपि स्वपादाद्भ्रश्यते हि सः ॥ 215 ॥

वित्तं बन्धुर्वय कर्म विद्या चैव तु पञ्चमी ।
एतानि मान्यस्थानानि गरीयो ह्युत्तरोत्तम् ॥ 216 ॥

गुणानुसारिणीं पूजां समां दृष्टिं च यो नरः ।
सर्वभूतेषु कुरुते तस्य विष्णुः प्रसीदति ॥ 217 ॥

यथा सुहृत्सु कर्तव्यं पितृशातृसुतेषु च ।
तथा करोति पूजादि समबुद्धिः स उच्यते ॥ 218 ॥

तिर्यक् पुण्ड्रं न कुर्वीत सम्प्राप्ते मरणेऽपि वा ।
न चान्यन्नाम विब्रूयात् परं नारायणादृते ॥ 219 ॥

नैवेद्यशेषं देवस्य यो भुनक्ति दिने दिने ।
सिक्थे सिक्थे भवेत् पुण्यं चान्द्रायणशताधिकम् ॥ 220 ॥

ऊर्ध्वपुण्ड्रं मृजुं सौम्यं ललाटे यस्य दृश्यते ।
स चण्डालोऽपि शुद्धात्मा पूज्य एव न संशयः ॥ 221 ॥

अशुचिर्वाऽप्यनाचारो मनसा पापमाचरन् ।
शुचिरेव भवेन्नित्यमूर्ध्वपुण्ड्राङ्कितो नरः ॥ 222 ॥

ऊर्ध्वपुण्ड्रविहीनस्य स्मशानसदृशं मुखम् ।
अवलोक्य मुखं तेषामादित्यमवलोकयेत् ॥ 223 ॥

यज्ञो दानं तपश्चैव स्वाध्यायः पितृतर्पणम् ।
व्यर्थं भवति तत् सर्वमूर्ध्वपुण्ड्रं विना कृतम् ॥ 224 ॥

गोपीचन्दनलिप्ताङ्गो यं यं पश्यति चक्षुषा ।
तं तं शुद्धं विजानीयान्नात्र कार्या विचारणा ॥ 225 ॥

आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः ।
वैष्णवोऽस्मत्कुले जातः स नः सन्तारयिष्यति ॥ 226 ॥

जीवितं विष्णुभक्तस्य वरं पञ्चदिनान्यपि ।
न तु कल्पसहस्रैस्तु भक्तिहीनस्य केशवे ॥ 227 ॥

किं तेन जातमात्रेण भूभारेणान्नशत्रुणा ।
यो जातो नार्चयेद्विष्णुं न स्मरेनापि कीर्तयेत् ॥ 228 ॥

यो ददाति द्विजातिभ्यश्चन्दनं गोपिमर्दितम् ।

अपि सर्षपमात्रेण पुनात्यासप्तमं कुलम् ॥ 229 ॥

ज्ञानी च कर्माणि सदोदितानि कुर्यादकामः सततं भवेत ॥ 230 ॥

अतीतानागतज्ञानि त्रैलोक्योद्धरणक्षमः ।

एतादृशोऽपि नाचारं श्रौतं स्मार्तं परित्यजेत् ॥ 231 ॥

यदेव विद्यया करोति श्रद्धयोपनिषदा

तदेव वीर्यवत्तरं भवति ॥ 232 ॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।

एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ 233 ॥

आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ।

वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः ॥ 234 ॥

निष्कामं ज्ञानपूर्वं तु निवृत्तमिह चोच्यते ।

निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनम् ॥ 235 ॥

श्रीमदानन्दतीर्थार्यसहस्रकिरणोत्थिता ।

गोततिः सततं सेव्या गीर्वाणैः सिद्धिदा भवेत् ॥ 236 ॥

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं ।
बट् तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपु-
र्मध्वो यत् तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥ 237 ॥

यः सर्वगुणसम्पूर्णः सर्वदोषविवर्जितः ।
प्रीयतां प्रीत एवालं विष्णुर्मे परमः सुहृत् ॥ 238 ॥

॥इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः श्रीकृष्णामृतमहार्णवः ॥

॥ श्री कृष्णार्पणमस्तु ॥

॥ मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा ॥

॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डानम् ॥